चेतितव्यम्, चेतयितव्यम्, चिचेतिषितव्यम्-चिचितिषितव्यम्, चेचिततव्यम्;
चेतनीयम्, चेतनीयम्, चिचेतिषणीयम्-चिचितिषणीयम्, चेचितनीयम्;
चेत्यम्, चेत्यम्, चिचेतिष्यम्-चिचितिष्यम्, चेचित्यम्;
ईषच्चेतः-दुश्चेतः-सुचेतः; — — —
चित्यमानः, चेत्यमानः, चिचेतिष्यमाणः-चिचितिष्यमाणः, चेचित्यमानः;
चेतः, चेतः, चिचेतिषः-चिचितिषः, चेचितः;
चेतितुम्, चेतयितुम्, चिचेतिषितुम्-चिचितिषितुम्, चेचितितुम्;
चित्तिः-प्रायश्चित्तिः, [1]चित्[A], चेतना, चिचेतिषा-चिचितिषा, चेचिता;
चेतनम्, चेतनम्, चिचेतिषणम्-चिचितिषणम्, चेचितनम्;
चेतित्वा-चितित्वा, चेतयित्वा, चिचेतिषित्वा-चिचितिषित्वा, चेचितित्वा;
प्रचित्य, प्रचेत्य, प्रचिचेतिष्य-प्रचिचितिष्य, प्रचेचित्य;
चेतम् २, } चेतम् २, } चिचेतिषम् २ चिचितिषम् २, }
चेतित्वा २-चितित्वा २, } चेतयित्वा २, } चिचेतिषित्वा २ चिचितिषित्वा २, }
चेचितम् २; }
चेचितित्वा २. }

[2]चेतः.

## (525) "चित्र चित्रीकरणे"

(X-चुरादिः-1917. सक. सेट्. उभ. अदन्तः।)

**चित्रीकरणम्**=आलेख्यकरणम्। कदाचित् दर्शने। 'चित्र' इत्यय मद्भुतदर्शने णिचं लभते—इति **सिद्धान्तकौमुदी**।

चित्रकः-त्रिका, चिचित्रयिषकः-षिका; चित्रयिता-त्री, चिचित्रयिषिता-त्री;

---

1. 'सम्पदादिभ्यः—'(वा-3-3-94) इति भावे बाहुलकात् क्विप्। **चित्**=चैतन्यम्—इत्यर्थः।
2. 'असुन्' [द. उ. 9. 49] इत्यसुन् प्रत्ययः। **चेतः**=मनः।

A. 'अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन् दिशः प्रश्च्युतितैः स्मितामृतैः॥' धा. का. 1. 6.